श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ त्रयोदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयोदशः सर्गः ॥

## महर्षिणागस्त्येन श्रीरामं प्रति परितोषं प्रकट्य सीतायाः प्रशंसनं श्रीरामेण पृष्टेन तेन पञ्चवट्यामाश्रमं निर्माय तत्रावस्थातुमाज्ञाप्रदानं श्रीरामप्रभृतीनां ततः प्रस्थानं च

राम प्रीतोऽस्मि भद्रं ते परितुष्टोऽस्मि लक्ष्मण।
अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया ॥ **3.13.1** ॥

अध्वश्रमेण वां खेदो बाधते प्रचुरश्रमः।
व्यक्तमुत्कण्ठते वापि मैथिली जनकात्मजा ॥ **3.13.2** ॥

एषा च सुकुमारी च खेदैश्च न विमानिता।
प्राज्यदोषं वनं प्राप्ता भर्तृस्नेहप्रचोदिता ॥ **3.13.3** ॥

यथैषा रमते राम इह सीता तथा कुरु।
दुष्करं कृतवत्येषा वने त्वामभिगच्छती ॥ **3.13.4** ॥

एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन।
समस्थमनुरज्यन्ते विषमस्थं त्यजन्ति च ॥ **3.13.5** ॥

शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा।
गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ **3.13.6** ॥

इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता।
श्लाघ्या च व्यपदेश्या च यथा देवीष्वरुन्धती ॥ **3.13.7** ॥

अलङ्कृतोऽयं देशश्च यत्र सौमित्रिणा सह।
वैदेह्या चानया राम वत्स्यसि त्वमरिन्दम॥ **3.13.8** ॥

एवमुक्तस्तु मुनिना राघवः संयताञ्जलिः।
उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलम्॥ **3.13.9** ॥

धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गवः।
गुणैः सभ्रातृभार्यस्य गुरुर्नः परितुष्यति॥ **3.13.10** ॥

किं तु व्यादिश मे देशं सोदकं बहुकाननम्।
यत्राश्रमपदं कृत्वा वसेयं निरतः सुखम्॥ **3.13.11** ॥

ततोऽब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य भाषितम्।
ध्यात्वा मुहूर्तं धर्मात्मा ततोवाच वचः शुभम्॥ **3.13.12** ॥

इतो द्वियोजने तात बहुमूलफलोदकः।
देशो बहुमृगः श्रीमान् पञ्चवट्यभिविश्रुतः॥ **3.13.13** ॥

तत्र गत्वाऽऽश्रमपदं कृत्वा सौमित्रिणा सह।
रमस्व त्वं पितुर्वाक्यं यथोक्तमनुपालयन्॥ **3.13.14** ॥

विदितो ह्येष वृत्तान्तो मम सर्वस्तवानघ।
तपसश्च प्रभावेण स्नेहाद् दशरथस्य च॥ **3.13.15** ॥

हृदयस्थं च ते च्छन्दो विज्ञातं तपसा मया।
इह वासं प्रतिज्ञाय मया सह तपोवने॥ **3.13.16** ॥

अतश्च त्वामहं ब्रूमि गच्छ पञ्चवटीमिति।
स हि रम्यो वनोद्देशो मैथिली तत्र रंस्यते॥ **3.13.17** ॥

स देशः श्लाघनीयश्च नातिदूरे च राघव।
गोदावर्याः समीपे च मैथिली तत्र रंस्यते॥ **3.13.18** ॥

**प्राज्यमूलफलैश्चैव नानाद्विजगणैर्युतः।**
**विविक्तश्च महाबाहो पुण्यो रम्यस्तथैव च॥ 3.13.19 ॥**

**भवानपि सदाचारः शक्तश्च परिरक्षणे।**
**अपि चात्र वसन् राम तापसान् पालयिष्यसि॥ 3.13.20 ॥**

**एतदालक्ष्यते वीर मधूकानां महावनम्।**
**उत्तरेणास्य गन्तव्यं न्यग्रोधमपि गच्छता॥ 3.13.21 ॥**

**ततः स्थलमुपारुह्य पर्वतस्याविदूरतः।**
**ख्यातः पञ्चवटीत्येव नित्यपुष्पितकाननः॥ 3.13.22 ॥**

**अगस्त्येनैवमुक्तस्तु रामः सौमित्रिणा सह।**
**सत्कृत्यामन्त्रयामास तमृषिं सत्यवादिनम्॥ 3.13.23 ॥**

**तौ तु तेनाभ्यनुज्ञातौ कृतपादाभिवन्दनौ।**
**तमाश्रमं पञ्चवटीं जग्मतुः सह सीतया॥ 3.13.24 ॥**

**गृहीतचापौ तु नराधिपात्मजौ**
**विषक्ततूणी समरेष्वकातरौ।**
**यथोपदिष्टेन पथा महर्षिणा**
**प्रजग्मतुः पञ्चवटीं समाहितौ॥ 3.13.25 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रयोदशः सर्गः ॥